श्री दत्तात्रेय प्रार्थना

श्री दत्तात्रेय प्रार्थना

ॐ नमस्ते भगवन् श्रीसद्गुरुदेव-दत्तात्रेयाय नमो नमः ||1||

त्वं ब्रह्ममयोऽसि | त्वं आनंदमयोऽसि | त्वं विज्ञानमयोऽसि |
त्वं सत्यमयोऽसि | त्वं शांतिमयोऽसि | त्वं प्रेममयोऽसि |
त्वं निराकारो निरालंबो निर्विकल्पो निर्विषयो निरंजनो निरंकुशो
निरंतरो निराशयो निरामयो निर्धूतकल्मषोऽसि ||2||

त्वदाज्ञया तपंति रविशशि-तारामंडलाः |
त्वदाज्ञया विपुलधनधान्यवती वसुधा |
त्वदाज्ञया वहति वायुस्संदहत्यनलः | त्वदाज्ञयाऽऽकाशं सर्वं व्याप्नोति |
त्वदाज्ञया यथाकालं वर्षति पर्जन्यः | त्वदाज्ञया विकसंति कुसुमानि |
त्वदाज्ञया फलंति पादपाः | त्वदाज्ञया गायंति विहंगमः |
त्वदाज्ञया जीवंति चतुर्विधयोनयः |
त्वदाज्ञया देहे प्राणः संचरति निर्गच्छति देहात् ||3||

त्वं मनश्चित्तांतःकरणबुद्ध्यहंकार-प्रेरकोऽसि |
त्वं शमदम-तितिक्षावैराग्य-भक्तिप्रदायकोऽसि |
त्वं द्वंद्वदुःख-तिमिर-विध्वंसकोऽसि | त्वं मायापाश-निकृंतकोऽसि |
त्वं संसार-बंधनच्छेदकोऽसि |
त्वं सर्वसद्गुणकर्ताऽसि | त्वं सर्वदुर्गुणहर्ताऽसि | त्वं शांतिप्रदोऽसि |
त्वमानंदप्रदोऽसि | त्वं प्रेमप्रदोऽसि | त्वं सकलविघ्नहरोऽसि |
त्वमभयकरोऽसि | त्वं वरदवरोऽसि | त्वं निजपद-प्रदानकरोऽसि ||4||

ऋते त्वत् कोऽपि नेतरो वदान्यः | ऋते त्वत् कोऽपि नेतरः समर्थः |
ऋते त्वत् कोऽपि नेतरो दयालुः | ऋते त्वत् कोऽपि नेतरः क्षमाशीलः |
ऋते त्वत् कोऽपि नेतरो भक्तपालकः ||5||

त्वत्तः सकलैश्वर्य-भोगक्षमत्वं | त्वत्तः सकलवस्तु-रमणीयत्वं |
त्वत्तः कर्मज्ञानेंद्रिय-गणसमर्थत्वं | त्वत्तः सकलयोग-शक्तिमत्त्वं |
त्वत्तः परमवैराग्य-परबुद्धिमत्त्वं ||6||

त्वयि समुपस्थितं ब्रह्मांडोत्पत्ति-स्थितिलयबीजं |
त्वयि सुप्रतिष्ठितं संसृतिनाशनाद्वैत-भावनामूलं |
त्वयि सन्निहितं जन्ममृत्युभय-संहननसामर्थ्यं ||7||

कनक-कामिनी-कमनीयत्वात् त्राहि त्राहि मां |
काम-क्रोध-मोह-मद-मत्सरकोलाहलात् त्राहि त्राहि मां |
जन्म-जरा-मरण-त्रिदोषात् त्राहि त्राहि मां |
संसृति-दावानल-दह्यमानं पाहि पाहि मां |
विषयकर्दम-निमज्जमानं पाहि पाहि मां |
भयकर-कालदंड-निपीडयमानं पाहि पाहि मां |
धर्माचरण-दिङ्मूढोऽहं धैर्यं देहि देहि मे |
अहंकारमलिन-चित्तोऽहमभयं वरं देहि देहि मे |
त्वत् पदपंकज-शरणागतिं देहि देहि मे ||8||

विना त्वया नास्ति कोऽप्यन्य आपत्तिनिवारकः | त्वं प्रियतमा माताऽसि मे |
त्वं प्रियतमः पिताऽसि मे | त्वं प्रियतमो बंधुरसि मे |
त्वं प्रियतमं मित्रमसि मे | त्वं पूज्यतमः सद्गुरुवर्योऽसि मे |
ते कृपाहस्तं देहि मे शिरसि | ते पदतलकंजं देहि मे मनसि |
ते सुखकर-वासोऽस्तु मे वपुषि |
अनंत-जन्मपर्यंतं ते स्मरणं मे चित्तेऽस्तु ||9||

ॐ नमस्ते अत्रिपुत्राय | ॐ नमस्ते अवधूताय | ॐ नमस्ते हंसदेवाय |
ॐ नमस्ते सद्गुरुनाथाय | ॐ नमस्ते यतिनाथाय | ॐ नमस्ते शक्तिनाथाय |
ॐ नमस्ते सिद्धिनाथाय | ॐ नमस्ते मुक्तिनाथाय | ॐ नमस्ते जगन्नाथाय |
ॐ नमस्ते भगवते दत्तात्रेयाय |
ॐ नमस्ते परब्रह्मणे सच्चिदानंदमूर्तये मुनिवर्याय नमो नमः ||10 ||इति श्री दत्तात्रेय प्रार्थना||